॥ श्रीराघवेंद्र मंगलाष्टकम ॥

श्रीमद्रामपदारविंदमधुपः श्रीमध्ववंशाधिपः
सच्छिष्योडु गणोडुपः श्रितजगद्गीर्वाणसत्पादपः ।
अत्यर्थं मनसा कृताच्युतजपः पापांधकारातपः
श्रीमत्सद्गुरुराघवेंद्रयतिराट कुर्याद्ध्रुवं मंगलम ॥ १ ॥

कर्मंदींद्र सुधींद्र सद्गुरु करांभोजोद्भवः संततं
प्राज्यध्यानवशीकृताखिलजगद्वास्तव्यलक्ष्मीधवः ।
सच्छास्त्रातिविदूषकाखिलमृषावादीभकंठीरवः
श्रीमत्सद्गुरुराघवेंद्रयतिराट कुर्याद्ध्रुवं मंगलम ॥ २ ॥

सालंकारककाव्यनाटककलाकाणादपातंजल
त्रय्यर्थस्मृतिजैमिनीयकवितासंगीतपारंगतः ।
विप्रक्षत्रविडंघ्रिजातमुखरानेकप्रजासेवितः
श्रीमत्सद्गुरुराघवेंद्रयतिराट कुर्याद्ध्रुवं मंगलम ॥ ३ ॥

रंगोत्तुंगतरंगमंगलकरश्रीतुंगभद्रातट
प्रत्यस्थद्विजपुंगवालयलसन्मंत्रालयाख्ये पुरे ।
नव्येंद्रोपलनीलभव्यकरसद्बृंदावनांतर्गतः
श्रीमत्सद्गुरुराघवेंद्रयतिराट कुर्याद्ध्रुवं मंगलम ॥ ४ ॥

विद्वद्राजशिरःकिरीटखचितानर्घ्योरुरत्नप्रभा
रागाघौघहपादुकाद्वयचरः पद्माक्षमालाधरः ।
भास्वद्दंडकमंडलूज्ज्वलकरो रक्तांबराडंबरः
श्रीमत्सद्गुरुराघवेंद्रयतिराट कुर्याद्ध्रुवं मंगलम ॥ ५ ॥

www.yousigma.com

यद्वृंदावनसप्रदक्षिणनमस्काराभिषॆकस्तुति
ध्यानाराधनमृद्विलॆपनमुखानॆकॊपचारान सदा ।
कारंकारमभिप्रयांति चतुरॊ लॊकाः पुमर्थान सदा
श्रीमत्सद्गुरुराघवॆंद्रयतिराट कुर्याद्ध्रुवं मंगलम ॥ ६ ॥
वॆदव्यासमुनीशमध्वयतिराट्टीकार्यवाक्यामृतं
ज्ञात्वाऽद्वैतमतं हलाहलसमं त्यक्त्वा समाख्याप्तयॆ ।
संख्यावत्सुखदां दशॊपनिषदां व्याख्यां समाख्यान मुदा
श्रीमत्सद्गुरुराघवॆंद्रयतिराट कुर्याद्ध्रुवं मंगलम ॥ ७ ॥
श्रीमद्वैष्णवलॊकजालकगुरुः श्रीमत्परिव्राड्भरुः
शास्त्रॆ दॆवगुरुः श्रितामरतरुः प्रत्यूहगॊत्रस्वरुः ।
चॆतॊऽतीतशिरुस्तथा जितवरुः सत्सौख्यसंपत्करुः
श्रीमत्सद्गुरुराघवॆंद्रयतिराट कुर्याद्ध्रुवं मंगलम ॥ ८ ॥
यः संध्यास्वनिशं गुरॊर्व्रतिपतॆः सन्मंगलस्याष्टकं
सद्यः पापहरं स्वसॆविविदुषां भक्त्यैव बाभाषितम ।
भक्त्या वक्ति सुसंपदं शुभपदं दीर्घायुरारॊग्यकं
कीर्तिं पुत्रकलत्रबांधवसुहृन्मूर्तीः प्रयाति ध्रुवम ॥ ९ ॥
॥ इति श्रीमदप्पणाचार्यकृतं श्रीराघवॆंद्रमंगलाष्टकम ॥